लघुपाराशरी

उपशास्त्री

22.08.20
1

अथ योगेपूरकरतामाह –

त्रिकोणाधिपयोर्मध्ये सम्बन्धो येन केनचित् ।
बलिनः केन्द्रनाथस्य भवेद्यदि सुयोगकृत् ॥

अन्वयः – चेत् त्रिकोणाधिपयोः मध्ये येनकेनचित् बलिनः केन्द्रनाथस्य सम्बन्धः भवेत् तर्हि सुयोगकृत् भवति।

संस्कृत – त्रिकोणाधिपयोः पञ्चमनवमेशयोर्मध्ये येन केनचित्सह बलिनः केन्द्रनाथस्य लग्नचतुर्थ सप्तम दशमेशानां मध्ये बलवतः सम्बन्धो भवेत्तदा सुयोगकृत् स्यात्। परमत्रपूर्वोक्तलक्षणात् पञ्चमनवमेशयोर्मध्ये यस्य कस्य केन्द्रनाथान्यतरेणबलवता सह सुयोगकृत् सुयोगं करोतीति स्थानसम्बन्धो भवेत्तदा सुयोग कृत्स्यात् - अथवा बलिनः केन्द्रनाथस्य दशमाधिपतेः पञ्चमनवमाधिपान्यतरेण सह यदि सुयोगकृद्योःस्थानसम्बन्धो भवेत्तदा सुयोगकृत् पूर्वलक्षणेन सुफलं विदधातीति।

क्षेमङ्करी – किसी त्रिकोणेश का बली दशमेश से सम्बन्ध हो अथवा किसी केन्द्रेश का नवमेश से सम्बन्ध हो, तो उत्तम योग होता है। उच्च, स्वगृह, मूलत्रिकोण और स्ववर्गों इनमें जो योगकारक हो, तो भी उत्तम योग होता है।

विमर्श – सर्वाधिक बली केन्द्र (दशम) के स्वामी और बली त्रिकोणेश (पञ्चम व नवम) में परस्पर सम्बन्ध हों, तो सर्वोत्तम राजयोग बनता है। क्योंकि नवमेश या पञ्चमेश, इनमें किसी के साथ यदि दशमेश का स्थान सम्बन्ध हो, तो भाग्य योगकारक होता है। लेकिन अन्य ग्रहों या भावेशों का जो सम्बन्ध होगा वह स्थान सम्बन्ध के वश अल्प बलवान् होगा। अतः सम्बन्ध के प्राबल्य से योग सिद्ध हो जाएगा।

P.T.O

उपश्लाध्वी

22.08.20
2

अथ शुभग्रहसम्बन्धेन योगफलप्राप्तिकालमाह—

दशास्वपि भवेद्योगः प्रायशो योगकारिणोः।
दशाद्वयीमध्यगतस्तद्युक् शुभकारिणाम् ॥

अन्वयः – प्रायशः योगकारिणोः दशा द्वयीमध्यगतः तद्युक् शुभकारिणां दशासु अपि योगः भवेत्।

संस्कृत – प्रायशो बाहुल्येन योगकारिणोः ग्रहयोः या दशा द्वयी दशाद्वयसमाहारः। तस्यां तद्युक्शुभकारिणां योगकारकग्रहद्वयसम्बन्धरहितानां शुभकारिणां दशासु अर्थाद्न्तर्दशासु योगः शुभप्राप्तिर्भवेत्। यथा नवमदशमाधीशयोः सम्बन्धाद्यदि भाग्ययोगः स्यात्तदा नवमेशस्य दशमेशस्य वा दशायां पञ्चमाधिपतेरन्तर्दशायां भाग्ययोगावाप्ति। अथवा योगकारिणोः ग्रहयोर्या दशाद्वयी एकस्य दशान्यस्यान्तर्दशा यथा नवमदशमाधीशयोः सम्बन्धे दशमेशस्य दशायां नवमेशस्यान्तर्दशा वा नवमेशस्य दशायां दशमेशस्यान्तर्दशा तन्मध्यगतो योगः तद्युक् शुभकारिणां तत्सम्बन्धरहितानां शुभकारिणां दशासु प्रत्यन्तर्दशादिषु भवेदित्यर्थः।

क्षेमङ्करी – किसी योगकारी ग्रह की दशा हो, उसमें सम्बन्धी योगकारी की अन्तर्दशा हो, तो इन दोनों से सम्बन्ध रहित जो शुभ ग्रह उनकी प्रत्यन्तर्दशा में अवश्य शुभफल की प्राप्ति होती है।

विमर्श – महर्षि पराशर के सिद्धान्तानुसार योग का फल योगकारक ग्रहों की दशान्तर्दशा के मध्य में पड़ने वाली योगकारकों की दशाद्वयी में शुभफल मिलता है। कभी-कभी देखा जाता है कि योगकारक ग्रहों के मध्य पड़ने वाली शुभ ग्रहों की दशाओं में योग का फल घटित हो जाता है। (लेकिन यदि मध्यगत दशा का स्वामी पराशर के मतानुसार)

(९) निगूढमणिबन्धौ तु पद्मगर्भसमप्रभौ।
विकृदयाङ्गुलिपर्वाणौ करौ नृपतियोषितः॥
कस्येदं वचनम्?

उत्तरम्- वराहमिहिरस्य।

(१०) मणिबन्धनसम्भूता मध्याङ्गुलिसमाश्रिता।
रेखा पाणितले यस्याः सा कन्या राजभागिनी॥
कस्य वाक्यमिदम्?

उत्तरम्- समुद्रस्य।

(११) कनिष्ठामूलसम्भूता मध्याङ्गुलिसमाश्रिता।
रेखा पाणितले यस्याः सा दीर्घजीविनी॥
कस्य कथनमिदम्?

उत्तरम्- समुद्रस्य।

(१२) कनिष्ठिकामूलभवा गता या प्रदेशिनीमध्यमिकान्तरालम्।
करोति रेखा परमायुषः सा प्रमाणमूना तु तदूनमायुः॥
कुतः संगृहीतमिदं पद्यम्?

उत्तरम्- बृहत्संहितातः।

(१३) कनिष्ठा पादयोर्यस्याः भूमिं स्पृशति नाङ्गुलिः।
न सा तिष्ठति कौमारी बन्धकीं तां विनिर्दिशेत्॥
कस्य वाक्यमिदम्?

उत्तरम्- समुद्रस्य।

(१४) कुम्भाकारमुदरं कासां कन्यकानाम्?

उत्तरम्- दुःखितानाम्।

(१५) लम्बोदरी च या कन्या दीर्घोदरसमन्विता।
भग्नोदरा च दुःखान्ता दासी भावमवाप्नुयात्॥
कस्योक्तिरियम्?

उत्तरम्- समुद्रस्य।

डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखचैना, पूर्णियाँ।

वस्तुनिष्ठप्रश्नाः

शास्त्री-I, II

22.08.20
3

(1) किंवर्णकाः दन्ताः शुभाः भवन्ति कन्यानाम् ?
उत्तरम्- धवलाः ।
(2) कीदृक् स्वना शुभा कन्या ?
उत्तरम्- पिकस्वना ।
(3) हंसस्वना दुन्दुभिनेमिघोषा मेघस्वनाः शङ्खनिनादघोषाः ।
मयूरचक्रप्रतिमस्वनाश्च स्त्रियस्तथा कोकिलतुल्यशब्दाः ॥
कस्येदं वाक्यम् ?
उत्तरम्- गर्गस्य ।
(4) नीलनीरजपत्राभा दृष्टिर्यस्याः भवेत्सदा ।
सा राजमहिषी ज्ञेया ज्योतिःशास्त्रविशारदैः ॥
केनोक्तं वाक्यम् ?
उत्तरम्- गर्गेण ।
(5) नो सङ्गते नाति पृथू न लम्बे शस्ते भ्रुवौ बालशशाङ्कवक्रे ।
अर्धेन्दुसंस्थानमरोमशञ्च शस्तं ललाटं न नतं न तुङ्गम् ॥
कुत्रास्ति पद्यमिदम् ?
उत्तरम्- वाराहीसंहितायाम् ।
(6) नातिलम्बौ मृदू तुल्यौ संलग्नौ पुष्टमांसलौ ।
कर्णौ यस्याः स्मृता सा तु राजभार्या न संशयः ॥
कस्य वाक्यमिदम् ?
उत्तरम्- वराहमिहिरस्य ।
(7) सौभाग्यवत्याः करतले किं चिह्नं शुभम् ?
उत्तरम्- मत्स्यस्य ।
(8) मत्स्यः पाणितले छत्रं कच्छपो वा ध्वजोऽपि वा ।
श्रीवत्सं कमलं शङ्खमासनं चामरं तथा ॥
अङ्कुशश्चैव माला च यस्याः हस्ते तु दृश्यते ।
एकं सा जनयेत्पुत्रं राजानं पृथिवीपतिम् ॥
कस्य वाक्यमिदम् ?
उत्तरम्- समुद्रस्य ।

P.T.O